*** अधोलिखितानाम् प्रश्नानाम् उत्तराणि प्रदत्तविकल्पेभ्यः चित्वा लिखत।** **[21]**

1. मानवजीवनस्य सुखाय समृद्धये च केषाम् पठनस्य आवश्यकता अस्ति?
   (A) दुर्भाषितानां (B) कटुभाषितानाम् (C) सुभाषितानाम् (D) कोऽपि न
   **उत्तर :** (C) सुभाषितानाम्
2. सुभाषितानि पठित्वा सर्वे किम् अवगच्छन्तु?
   (A) जीवनस्य रहस्यम् (B) संसारस्यदुःखम् (C) युद्धस्य पराक्रमम् (D) सर्वेऽपि
   **उत्तर:** (A) जीवनस्य रहस्यम्
3. "पिको वसन्तस्य गुणं न वायसः" - इत्यस्य तात्पर्यं किम्?
   (A) पिकः मधुरं गायति न वायसः (B) सुजन एव गुणं जानाति
   (C) वायसः अपि सरसं गानं करोति (D) वसन्तः निर्गुणः अस्ति
   **उत्तर :** (B) सुजन एव गुणं जानाति
4. "भवन्ति नम्राः तरवः फलोद्गमैः" - इत्यस्य अर्थः कः?
   (A) वृक्षाणां कठोरता (B) सत्पुरुषाणाम् उन्नतिः
   (C) फलयुक्ताः वृक्षाः नम्राः भवन्ति (D) परोपकारिणां दुर्बलता
   **उत्तर :** (C) फलयुक्ताः वृक्षाः नम्राः भवन्ति
5. "गायन्ति देवाः किल गीतकानि" - इत्यस्य श्लोकस्य मुख्यविषयः कः?
   (A) वसन्तस्य सौन्दर्यम् (B) भारतभूमेः गौरवम् (C) कर्मणां फलम् (D) दानस्य प्रभावः
   **उत्तर :** (B) भारतभूमेः गौरवम्
6. "गुणी गुणं वेत्ति" - इत्यत्र कः गुणं न जानाति?
   (A) गुणी (B) निर्गुणः (C) पिकः (D) बली
   **उत्तर :** (B) निर्गुणः
7. दुर्जनेन सह सख्यं किमर्थं न कार्यम्?
   (A) सः मित्रं भवति (B) सः धनं ददाति
   (C) सः शिक्षां ददाति (D) सः उष्णोङ्गारवद् हानिकरः भवति
   **उत्तर :** (D) सः उष्णोङ्गारवद् हानिकरः भवति
8. "न सा सभा यत्र न सन्ति वृद्धाः" - इत्यत्र सभायाः महत्त्वं किम्?
   (A) सभा मनोरञ्जनाय भवति (B) सभा धनसम्पत्तिं प्रदातुं शक्नोति
   (C) धर्मोपदेशाय ज्ञानवृद्धाः जनाः आवश्यकाः (D) सभा केवलं राजकार्यार्थं भवति
   **उत्तर :** (C) धर्मोपदेशाय ज्ञानवृद्धाः जनाः आवश्यकाः
9. भारतभूमेः गुणगानम् के कुर्वन्ति?
   (A) दानवाः (B) देवाः (C) असुराः (D) दुर्जनाः
   **उत्तर :** (B) देवाः

10. भारतभूमौ देवाः अपि देवत्वं विहाय केन रूपेण जन्मग्रहणार्थम् अभिलषन्ति?

(A) दानरूपेण (B) दानवरूपेण (C) दुर्जनरूपेण (D) मनुष्यरूपेण

**उत्तर :** (D) मनुष्यरूपेण

11. केन वृक्षाः नम्राः भवन्ति?

(A) पत्राणिभारेण (B) शाखाभारेण (C) फलभारेण (D) मूलभारेण

**उत्तर :** (C) फलभारेण

12. गुणवान् जनः अन्येषाम् कान् ज्ञातुम् शक्नोति?

(A) त्रिगुणान् (B) दुर्गुणान् (C) निर्गुणान् (D) सद्गुणान्

**उत्तर :** (D) सद्गुणान्

13. मूषकः कस्य बलम् न वेत्ति?

(A) बलवतः (B) सिंहस्य (C) करिणः (D) अन्यस्य

**उत्तर :** (B) सिंहस्य

14. कः सुवर्णस्य कर्तनम् करोति?

(A) लोहकारः (B) कुम्भकारः (C) शिल्पकारः (D) सुवर्णकारः

**उत्तर :** (D) सुवर्णकारः

15. केन समं सख्यं न कारयेत्?

(A) दुर्जनेन (B) सज्जनेन (C) मलिनेन (D) शीतलेन

**उत्तर:** (A) दुर्जनेन

16. ज्ञानवृद्धाः कस्मिन्विषये वदेयुः?

(A) अधर्म विषये (B) अज्ञान विषये (C) असत्य विषये (D) धर्म विषये

**उत्तर :** (D) धर्म विषये

17. नवजलैः परिपूर्णाः के अवनताः भवन्ति?

(A) तडागाः (B) नद्यः (C) मेघाः (D) कोऽपि न

**उत्तर :** (C) मेघाः

18. निकषप्रस्तरे अर्थम् किम्?

(A) स्फटिक प्रस्तरे (B) सुवर्ण प्रस्तरे (C) रजत प्रस्तरे (D) आकलन प्रस्तरे

**उत्तर :** (D) आकलन प्रस्तरे

19. परोपकारिणः सदैव किमर्थम् यत्नशीलाः भवन्ति?

(A) दुष्टसंगाय (B) पापाय (C) ताडनाय (D) परस्य उपकाराय

**उत्तर :** (D) परस्य उपकाराय

20. पुरुषार्थेन विना किम् न सिध्यति?

(A) कटुफलम् (B) विफलम् (C) फलम् (D) कोऽपि न

**उत्तर :** (C) फलम्

21. मानवः उत्तम गुणान् आश्रित्य किम् भवति?

(A) अपमानितः (B) पदावनतः (C) सम्मानितः (D) सर्वेऽपि

**उत्तर :** (C) सम्मानितः

*** अधोलिखित वाक्येषु रिक्तस्थानानि कोष्ठकेभ्यः उचित पदं चित्वा।** **[18]**

22. गुणाः पुरुषं दीपयन्ति—प्रज्ञा, कौल्यं, दमः, __________। (श्रुतम / शीलेन)

**उत्तर :** गुणाः पुरुषं दीपयन्ति—प्रज्ञा, कौल्यं, दमः, **श्रुतम्।**

23. दानं यथाशक्ति __________ च। (कृतज्ञता / सिध्यति)

**उत्तर :** दानं यथाशक्ति **कृतज्ञता** च।

24. पुरुषः परीक्ष्यते कुलेन, __________ , गुणेन, कर्मणा। (श्रुतम् / शीलेन)

**उत्तर :** पुरुषः परीक्ष्यते कुलेन, **शीलेन**, गुणेन, कर्मणा।

25. भवन्ति नम्राः तरवः __________ । (फलोद्गमैः / गुण)

**उत्तर :** भवन्ति नम्राः तरवः **फलोद्गमैः**।

26. सुभाषितानि सर्वदा __________ हिताय भवन्ति। (जनानाम् / पशूनाम्)

**उत्तर :** जनानाम्

27. एवं पुरुषकारेण विना दैवं न __________। (कृतज्ञता / सिध्यति)

**उत्तर :** एवं पुरुषकारेण विना दैवं न **सिध्यति**।

28. ये मानवाः अस्याम् भारतभूमौ जन्म प्राप्नुवन्ति ते __________। (धन्याः / कृतघ्नाः)

**उत्तर :** धन्याः

29. __________ वसन्तस्य गुणम् वेत्ति। (वायसः / पिकः)

**उत्तर :** पिकः

30. चतुर्भिः प्रकारैः परीक्ष्य कनकस्य __________ ज्ञातुम् शक्नुमः। (अपूर्णशुद्धता / पूर्णशुद्धता)

**उत्तर :** पूर्णशुद्धता

31. स्वसमृद्धि काले सत्पुरुषाः सहृदयेन __________ सन्ति। (उद्धताः / अनुद्धताः)

**उत्तर :** अनुद्धताः

32. गुणहीनः जनः अपरेषाम् __________ अवगन्तुम् समर्थः न भवति। (दुर्गुणान् / सद्गुणान्)

**उत्तर :** सद्गुणान्

33. परोपकारः पुण्याय __________ परपीडनम्। (सत्याय / पापाय)

**उत्तर :** पापाय

34. अस्मिन् संसारे __________ सभासु जनसमागमः भवति। (एकः / अनेकाः)

**उत्तर :** अनेकाः

35. __________ गुणाः पुरुषम् दीपयन्ति। (दशाः / अष्टौ)

**उत्तर :** अष्टौ

36. धर्मसम्बद्धायां चर्चायां __________ एव वक्तव्यम्। (सत्यम् / अनुतमे)

**उत्तर :** सत्यम्

37. भाग्ये स्थितेऽपि __________ एव फलम् लभ्यते। (अप्रयत्नेन / उद्योगेन)

**उत्तर :** उद्योगेन

38. __________ समं सख्यं न कारयेत्। (सज्जनेन / दुर्जेनेन)

**उत्तर :** दुर्जेनेन

39. गुणी __________ वेत्ति न वेत्ति निर्गुणः। (गुणं / कृतज्ञता)

**उत्तर :** गुणी **गुणं** वेत्ति न वेत्ति निर्गुणः।

*** स्तम्भयोः मेलनं कुरुत।** **[20]**

| (अ) उक्तिः | (आ) भावार्थः |
|---|---|
| 40. अष्टौ गुणाः पुरुषं दीपयन्ति | (i) दुष्टसङ्गः उष्णाङ्गारसदृशः |
| 41. दुर्जनेन समं सख्यं न कारयेत् | (ii) प्रज्ञा, दमः, दानं, कृतज्ञता इत्यादयः |
| 42. एकेन चक्रेण न रथस्य गतिः | (iii) भारतभूमेः माहात्म्यवर्णनम् |
| 43. गायन्ति देवाः किल गीतकानि | (iv) केवलं दैवं प्रयत्नं विना असिद्धम् |

**उत्तर :**

| (अ) उक्तिः | (आ) भावार्थः |
|---|---|
| 1. अष्टौ गुणाः पुरुषं दीपयन्ति | (ii) प्रज्ञा, दमः, दानं, कृतज्ञता इत्यादयः |
| 2. दुर्जनेन समं सख्यं न कारयेत् | (i) दुष्टसङ्गः उष्णाङ्गारसदृशः |
| 3. एकेन चक्रेण न रथस्य गतिः | (iv) केवलं दैवं प्रयत्नं विना असिद्धम् |
| 4. गायन्ति देवाः किल गीतकानि | (iii) भारतभूमेः माहात्म्यवर्णनम् |

| शब्दाः | अर्थाः |
|---|---|
| 44. श्रृङ्खलितम् | (i) निर्वाणम् |
| 45. अपवर्गः | (ii) अनुशासितम् |
| 46. भूयः | (iii) गजः |
| 47. करी | (iv) पुनः पुनः |

**उत्तर :**

| शब्दाः | अर्थाः |
|---|---|

| | |
|---|---|
| 1. श्रृङ्खलितम् | (ii) अनुशासितम् |
| 2. अपवर्गः | (i) निर्वाणम् |
| 3. भूयः | (iv) पुनः पुनः |
| 4. करी | (iii) गजः |

| शब्दाः | अर्थाः |
|---|---|
| 48. निघर्षणम् | (i) विशेषज्ञानम् |
| 49. प्रज्ञा | (ii) घर्षणम् |
| 50. सख्यम् | (iii) दग्धकाष्ठः |
| 51. अङ्गारः | (iv) मैत्री |

**उत्तर :**

| शब्दाः | अर्थाः |
|---|---|
| 1. निघर्षणम् | (ii) घर्षणम् |
| 2. प्रज्ञा | (i) विशेषज्ञानम् |
| 3. सख्यम् | (iv) मैत्री |
| 4. अङ्गारः | (iii) दग्धकाष्ठः |

| शब्दाः | अर्थाः |
|---|---|
| 52. तरवः | (i) दूरात् अधः अवनताः |
| 53. दूरविलम्बिनः | (ii) वृक्षाः |
| 54. समृद्धिभिः | (iii) शास्त्रज्ञानम् |
| 55. श्रुतम् | (iv) प्रचुरैः धनै |

**उत्तर :**

| शब्दाः | अर्थाः |
|---|---|
| 1. तरवः | (ii) वृक्षाः |
| 2. दूरविलम्बिनः | (i) दूरात् अधः अवनताः |
| 3. समृद्धिभिः | (iv) प्रचुरैः धनै |

| | |
|---|---|
| 4. श्रुतम् | (iii) शास्त्रज्ञानम् |

| (अ) उक्तिः | (आ) भावार्थः |
|---|---|
| 56. गायन्ति देवाः किल गीतकानि | (i) सज्जनः एव गुणानां मर्मज्ञः |
| 57. गुणी गुणं वेत्ति | (ii) भारतभूमेः माहात्म्यवर्णनम् |
| 58. भवन्ति नम्राः तरवः फलोद्गमैः | (iii) सुवर्णं चतुर्भिः प्रकारैः परीक्ष्यते |
| 59. यथा चतुर्भिः कनकं परीक्ष्यते | (iv) सत्पुरुषाणां स्वाभाविकी नम्रता |

**उत्तर :**

| (अ) उक्तिः | (आ) भावार्थः |
|---|---|
| 1. गायन्ति देवाः किल गीतकानि | (ii) भारतभूमेः माहात्म्यवर्णनम् |
| 2. गुणी गुणं वेत्ति | (i) सज्जनः एव गुणानां मर्मज्ञः |
| 3. भवन्ति नम्राः तरवः फलोद्गमैः | (iv) सत्पुरुषाणां स्वाभाविकी नम्रता |
| 4. यथा चतुर्भिः कनकं परीक्ष्यते | (iii) सुवर्णं चतुर्भिः प्रकारैः परीक्ष्यते |

*** अधोलिखितानां प्रश्नानाम् एकपदेन उत्तरं लिखत।** **[7]**

60. कः बलं न वेत्ति?

**उत्तर :** निर्बलः

61. कः वसन्तस्य गुणं वेत्ति?

**उत्तर :** पिकः

62. केन समं सख्यं न करणीयम्?

**उत्तर :** दुर्जेनेन

63. गीतानि के गायन्ति?

**उत्तर :** देवाः

64. फलोद्गमैः के नम्राः भवन्ति?

**उत्तर :** तरवः

65. मूषकः कस्य बलं न वेत्ति?

**उत्तर :** सिंहस्य

66. केन विना दैवं न सिध्यति?

**उत्तर :** पुरुषकारेण

*** पूर्णवाक्येन उत्तरं लिखत।** **[30]**

67. तरवः कदा नम्राः भवन्ति?

**उत्तर :** तरवः फलोद्गमैः नम्राः भवन्ति।

68. दैवं कदा न सिध्यति?

**उत्तर :** पुरुषकारेण विना दैवं न सिध्यति।

69. सत्पुरुषाणां स्वभावः कीदृशः भवति?

**उत्तर :** सत्पुरुषाणाम् स्वभावः परोपकारिणः भवति।

70. सत्यम् कदा सत्यम् न भवति?

**उत्तर :** सत्यम् सत्यम् न भवति यदा छलमुक्तम् कार्यम् दृश्यते।

71. सुभाषितानां पठनस्य किमर्थम् आवश्यकता अस्ति?

**उत्तर :** मानव जीवनस्य सुखाय समृद्धये च सुभाषितानां पठनस्य आवश्यकता अस्ति। यः तानि पठित्वा कार्यक्षेत्रे तेषाम् ज्ञानस्य प्रयोगं करोति, सः बहून् लाभान् प्राप्नोति।

72. देवाः किमर्थम् सुरत्वम् विहाय मनुष्यरूपेण भारतभूमौ जन्म ग्रहणार्थम् अभिलषन्ति?

**उत्तर :** देवाः धर्म-अर्थ-काम-मोक्षप्राप्तये भारतभूमौ देवत्वं विहाय मनुष्यरूपेण जन्मग्रहणार्थम् अभिलषन्ति।

73. सुभाषितानि किम् किम् कुर्वन्ति?

**उत्तर :** सुभाषितानि स्वकर्तव्यस्य अकर्तव्यस्य च विषये मार्गदर्शनम् कुर्वन्ति। तानि पठित्वा सर्वे जीवनस्य रहस्यम् अवगच्छन्तु।

74. बलहीनः जनः केषाम् बलं ज्ञातुम् न शक्नोति?

**उत्तर :** बलहीनः जनः अन्येषां बलम् ज्ञातुम् न शक्नोति यतः सः बलस्य महत्तां न जानाति।

75. मेघाः केन अवनताः भवन्ति किमर्थं च?

**उत्तर :** मेघाः नवजलैः पूर्णाः अवनताः भवन्ति यतः ते भूमिं प्रति आयान्ति परोपकाराय वृष्टिं च कुर्वन्ति। भूमिः शस्य-श्यामला भवति।

76. कीदृशैः गुणैः पुरुष परीक्ष्यते?

**उत्तर :** पुरुषः कुलेन, शीलेन, गुणेन कर्मणा च इत्यादि चतुर्भिः प्रकारैः परीक्ष्यते। कस्मिन् परिवारे अस्य जन्मः, स्वभावः कीदृशः अस्ति, कीदृशैः गुणैः युक्तः, केन कर्मणा च समादृतः भवति आदि।

77. के गुणाः पुरुषम् दीपयन्ति किमर्थं च?

**उत्तर :** प्रज्ञा, कौल्यम्, दमः, श्रुतम् पराक्रमः, मितभाषिता, यथाशक्ति दानम् कृतज्ञता-इत्यादि गुणाः पुरुषम् दीपयन्ति यतः सः उत्तम गुणान् आश्रित्य सम्मानितः भवति।

78. सखा कीदृशम् भवेत्?

**उत्तर :** सखा सज्जन-इव भवेत् यतः दुर्जनः सदा अनिष्टम् एव करोति। यथा उष्ण-अङ्गारः तापेन करम् ज्वालयति शीतलः च हस्तम् मलिनम् करोति।

79. धर्मसम्बद्धायां चर्चायाम् सत्यमेव हि किमर्थम् वक्तव्यम्?

**उत्तर :** धर्मसम्बद्धायां चर्चायाम् सत्यमेव हि वक्तव्यम्, यदि तथ्यं सत्ययुक्तम् न भवेत तर्हि चर्चा छलना-युक्तम् भवति।

80. भावार्थ स्पष्टीकुरुत - उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।

**उत्तर :** कार्याणि सदा उद्यमेन (परिश्रमेण) हि सिध्यन्ति। पुरुषार्थं विना विफलत एव लभ्यते। यथा रथस्य गतिः चक्रद्वयेन सम्यक् भवति। प्रयत्नः (उद्यमः) भाग्यं च मानवः -रथस्य द्वे चक्रे स्तः।

81. समृद्धिभिः के अनुद्धताः भवन्ति?

**उत्तर :** समृद्धिभिः सत्पुरुषाः अनुद्धताः भवन्ति।

* **रेखाङ्कित पदानि अधिकृत्य प्रश्ननिर्माणं कुरुत।** **[10]**

82. सत्पुरुषाः स्व समृद्धिभिः अनुद्धताः। परोपकारिणाम् स्वभावः एषः एव।

**उत्तर : के** पुरुषाः स्व समृद्धिभिः अनुद्धताः?

83. समयानुसारं वृक्षेषु फलानि जायते।

**उत्तर : कदा** वृक्षेषु फलानि जायन्ते?

84. गुणी गुणं वेत्ति न वेत्ति निर्गुणः।

**उत्तर :** गुणी **किम्** वेत्ति?

85. वयम् सर्वे भारतीयाः भाग्यशालिनः स्मः यत् देवाः भारतभूमेः गुणगानं कुर्वन्ति।

**उत्तर :** वयम् सर्वे भारतीयाः **किमर्थम्** भाग्यशालिनः?

86. सुभाषितानि पठनेन आदर्श-मानवजीवन-निर्माय प्रेरणा प्राप्यते।

**उत्तर :** सुभाषितानि पठनेन **कस्य निर्माय** प्रेरणा प्राप्यते?

87. वायसः वसन्तस्य गुणं न वेत्ति।

**उत्तर : कः** वसन्तस्य गुणं न वेत्ति?

88. पुरुषकारेण विना दैवम् न सिध्यति।

**उत्तर : केन** विना दैवम् न सिध्यति?

89. यस्याम् सभायाम् वृद्धाः न सन्ति, सा सभा सभा न कथ्यते।

**उत्तर : कुत्र** वृद्धाः न सन्ति, सा सभा सभा न कथ्यते?

90. अङ्गारकारः सदा अनिष्टम् एव करोति।

**उत्तर :** अङ्गारकारः सदा **किम्** करोति?

91. निकषेषु परीक्ष्य एव मानवस्य सुवर्णस्य च, स्वभावं ज्ञातुम् शक्यते।

**उत्तर : केषु** परीक्ष्य एव मानवस्य सुवर्णस्य च स्वभावं ज्ञातुम् शक्यते?

* **अधोलिखितशब्दानाम् अर्थान् विलिख्य वाक्येषु प्रयोगं कुरुत।** **[10]**

92. अम्बुभिः - ____________

**उत्तर :** अम्बुभिः - जल से
वाक्य - नवाम्बुभिः परिपूर्णाः मेघाः अवनताः भवन्ति।

93. निर्गुणः - ____________

**उत्तर :** निर्गुणः - गुणहीन
वाक्य - निर्गुणः अपरेषाम् गुणान् ज्ञातुम् समर्थः न भवति।

94. पिकः - ____________

**उत्तर :** पिकः - कोयल
वाक्य - वसन्ते आगमने पिकस्य गुणान् वायसः ज्ञातुम् न शक्यते।

95. सुरत्वात् - ____________

**उत्तर :** सुरत्वात - देवत्व से
वाक्य - देवाः सुरत्वात् भूयः भारतभूमिभागे पुरुषाः भवन्ति।

96. अनुद्धताः - ____________

**उत्तर :** अनुद्धताः - गर्वरहित
वाक्य - परोपकारिणः स्वसमृद्धि कालेऽपि अनुद्धताः, परोपकार्येषु यत्नशीलाः भवन्ति।

97. अबहुभाषिता - ____________

**उत्तर :** अबहुभाषिता - कम और सार्थक बोलना
वाक्य - अष्टसु गुणेषु अबहुभाषिता मानवस्य प्रधानं गुणम् येन तस्य स्वभावः परीक्ष्यते।

98. अभ्युपैति - ____________

**उत्तर :** अभ्युपैति - प्राप्नोति
वाक्य - धर्म-सम्बद्धायाम् सभायाम् यदि तथ्ययुक्तम् कथनम् न भवेत् तर्हि तत्र छलम् अभ्युपैति।

99. दीपयन्ति - ____________

**उत्तर :** दीपयन्ति - प्रकाशित करते हैं
वाक्य - सज्जनाः सदैव सद्गुणैः दीपयन्ति।

100. परीक्ष्यते - ____________

**उत्तर :** परीक्ष्यते - परीक्षा की जाती है
वाक्य - सज्जनाः अपि गुणेन, कुलेन, शीलेन, स्वभावेनरूपी निकषेण परीक्ष्यन्ते।

101. सत्पुरुषाः - ____________

**उत्तर :** सत्पुरुषाः - सज्जन पुरुष
वाक्य - सत्पुरुषाः सदैव परोपकारिणे रताः सन्ति।

*** अधोलिखित पद्याश पठित्वा प्रश्नानाम् उत्तराणि लिखत।** **[56]**

102. भवन्ति नम्रास्तरवः फलोद्गमैः नवाम्बुभिर्दूरविलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम् ॥
I. एकपदेन उत्तरत -
(i) तरवः कदा नम्राः भवन्ति?
(ii) समृद्धिभिः अनुद्धताः के भवन्ति?
II. पूर्णवाक्येन उत्तरत -
परोपकारिणाम् कीदृशः स्वभावः?
III. निर्देशानुसारम् उत्तरत -
(i) समृद्धिभिः के अनुद्धताः भवन्ति?
(अ) दुर्जनाः (ब) दुष्टाः (स) सत्पुरुषाः (द) कुपुरुषाः
(ii) नवजलैः मेघाः कीदृशाः भवन्ति?
(अ) उद्धताः (ब) अवनताः (स) उन्नताः (द) अधमाः

(iii) तरवः कदा नम्राः भवन्ति?
(अ) पर्णोद्गमैः (ब) शाखोद्गमैः (स) परागोद्गमैः (द) फलोद्गमैः

**उत्तर :** I. (i) फलोद्गमैः
(ii) सत्पुरुषाः
II. परोपकारिणाम् नम्राः, अवनताः अनुद्धताः च एष स्वभावः।
III. (i) (स) सत्पुरुषाः
(ii) (ब) अवनताः
(iii) (द) फलोद्गमैः

103. यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः।
तथा चतुर्भिः पुरुषः परीक्ष्यते कुलेन शीलेन गुणेन कर्मणा ॥
I. एकपदेन उत्तरत -
(i) चतुर्भिः किम् परीक्ष्यते?
(ii) स्वर्णकारः सुवर्णस्य शुद्धताम् परीक्षयितुम् कुत्र निघर्षणं करोति?
II. पूर्णवाक्येन उत्तरत -
पुरुषस्य आकलनम् कीदृशं भवति?
III. निर्देशानुसारम् उत्तरत -
(i) सुवर्णस्य कर्तनं कः करोति?
(अ) काष्ठकारः (ब) मूर्तिकारः (स) कुम्भकारः (द) सुवर्णकारः
(ii) चतुर्भिः उपायैः कः परीक्षणीयः?
(अ) पशुः (ब) पक्षी (स) पुरुषः (द) मृत्तिका
(iii) अन्ते सुवर्णकारः सुवर्ण-खण्डे किम् करोति?
(अ) पालनम् (ब) प्रहारम् (स) दाहनम् (द) कर्तनम्

**उत्तर :** I. (i) सुवर्णः/पुरुषः
(ii) निकषप्रस्तरे
II. पुरुषस्य आकलनम् कुलेन, शीलेन, गुणेन कर्मणा च भवति। जन्मस्य परिवारः, तस्य स्वभावः, गुणाः पुनश्च सः केन कर्मणा सर्वत्र समादृतः भवति।
III. (i) (द) सुवर्णकारः
(ii) (स) पुरुषः
(iii) (ब) प्रहारम्

104. गुणी गुणं वेत्ति न वेत्ति निर्गुणः बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः करी च सिंहस्य बलं न मूषकः॥
I. एकपदेन उत्तरत -
(i) निर्गुणः किम् न वेत्ति?
(ii) करी कस्य बलम् वेत्ति?
II. पूर्णवाक्येन उत्तरत -
पिकः वसन्तस्य गुणानुरूपम् किम् करोति?
III. निर्देशानुसारम् उत्तरत -
(i) कः अन्येषां बलं ज्ञातुम् शक्नोति?
(अ) सिंहः (ब) बलवान् (स) काकः (द) कोऽपि न
(ii) गुणहीनः जनः अपरेषाम् कान् अवगन्तुम् समर्थः न भवति?

(अ) दुर्गुणान् (ब) दुर्जनान् (स) निर्बलान् (द) सुगुणान्

(iii) मूषकः कस्य बलं न वेत्ति?

(अ) बलवतः (ब) सिंहस्य (स) वायसस्य (द) वसन्तस्य

**उत्तर :** I. (i) गुणम्

(ii) सिंहस्य

II. पिकः वसन्तस्य गुणानुरूपम् कुहुतानम् करोति ।

III. (i) (ब) बलवान्

(ii) (द) सुगुणान्

(iii) (ब) सिंहस्य

105. न सा सभा यत्र न सन्ति वृद्धाः वृद्धा न ते ये न वदन्ति धर्मम्।
धर्मः स नो यत्र न सत्यमस्ति सत्यं न तद्यच्छलमभ्युपैति ॥

I. एकपदेन उत्तरत -

(i) सा सभा यत्र के न सन्ति, सभा न कथयति?

(ii) सभायाम् वृद्धैः किम् न वक्तव्यम्?

II. पूर्णवाक्येन उत्तरत -

कुत्र छलम् अभ्युपैति ?

III. निर्देशानुसारम् उत्तरत -

(i) अस्मिन् संसारे कियत् सभाः सन्ति?

(अ) एकः (ब) विविधाः (स) दश (द) द्वे

(ii) सभासु किम् भवति?

(अ) वृद्ध समागमः (ब) धर्मसमागमः (स) जनसमागमः (द) कोऽपि न

(iii) धर्मसम्बद्धायां चर्चायाम् किम् वक्तव्यम् यत् सभा सफला भवति?

(अ) असत्यम् (ब) दुर्वचनम् (स) सत्यम् (द) अधर्मम्

**उत्तर :** I. (i) वृद्धाः

(ii) अधर्मम्

II. यत्र सत्यम् न अस्ति तत्र छलम् एव अभ्युपैति।

III. (i) (ब) विविधाः

(ii) (स) जनसमागमः

(iii) (स) सत्यम्

106. यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत्।
एवं पुरुषकारेण विना दैवं न सिध्यति ॥

I. एकपदेन उत्तरत -

(i) रथस्य केन न गतिर्भवेत्?

(ii) पुरुषकारेण विना किम् न सिध्यति?

II. पूर्णवाक्येन उत्तरत -

रथस्य गतिः केन न सम्यक् भवति?

III. निर्देशानुसारम् उत्तरत -

(i) भाग्ये स्थितेऽपि ____________ एव फलं लभ्यते। (उचितं शब्दं चित्वा रिक्त स्थानं पूरयत)

(अ) कारणेन (ब) आलस्येन (स) मनोरथेन (द) उद्योगेन

(ii) एकेन चक्रेण कस्य गर्ति न भवेत्?

(अ) मानवस्य (ब) पौरुषस्य (स) मनोरथस्य (द) रथस्य

(iii) मानवरथस्य के द्वे चक्रे स्तः? एकम् भाग्यम् अन्यञ्च ________।

(अ) अलसम् (ब) मनोरथम् (स) प्रयत्नम् (द) कोऽपि न

**उत्तर :** I. (i) एकेन चक्रेण

(ii) दैवम्

II. रथस्य गतिः एकेन चक्रेण न सम्यक् भवति।

III. (i) (द) उद्योगेन

(ii) (द) रथस्य

(iii) (स) प्रयत्नम्

107. अष्टौ गुणाः पुरुषं दीपयन्ति प्रज्ञा च कौल्यं च दमः श्रुतं च।
पराक्रमश्चाबहुभाषिता च दानं यथाशक्ति कृतज्ञता च ॥

I. एकपदेन उत्तरत -

(i) 'प्रज्ञा' शब्दस्य अर्थम् किम् ?

(ii) मानवः कान् गुणान् आश्रित्य सम्मानितः भवति?

II. पूर्णवाक्येन उत्तरत-

अष्टौ गुणाः के सन्ति?

III. निर्देशानुसारम् उत्तरत -

(i) अल्पभाषिता अर्थम् किम् अस्ति ?

(अ) कटुभाषिता (ब) मृदुभाषिता (स) अबहुभाषिता (द) कृतज्ञता

(ii) अष्टौ गुणाः कम् दीपयन्ति?

(अ) पुरुषम् (ब) दुर्जनम् (स) असुरम् (द) दानवम्

(iii) दानम् कीदृशम् दत्तम्?

(अ) सामर्थ्यम् अतिक्रम्य (ब) सामर्थ्यानुसारेण

(स) प्रचुरमात्रायाम् (द) अल्पमात्रायाम्

**उत्तर :** I. (i) विशेष-बुद्धिः

(ii) उत्तमान्

II. अष्टौ गुणाः - प्रज्ञा, कौल्यं, दमः, श्रुतं, पराक्रमः, अबहुभाषिता च यथाशक्ति दानं कृतज्ञता च इत्यादिर्नः सन्ति।

III. (i) (स) अबहुभाषिता

(ii) (अ) पुरुषम्

(iii) (ब) सामर्थ्यानुसारेण

108. गायन्ति देवाः किल गीतकानि धन्यास्तु ते भारतभूमिभागे।
स्वर्गापवर्गास्पदमार्गभूते भवन्ति भूयः पुरुषाः सुरत्वात् ॥

I. एकपदेन उत्तरत -

(i) देवाः कानि गायन्ति?

(ii) भारतभूमिभागे कस्मात् भूयः पुरुषाः भवन्ति?

II. पूर्णवाक्येन उत्तरत -

के मानवाः धन्याः?

III. निर्देशानुसारम् उत्तरत -

(i) भारतभूमेः गुणगानं के कुर्वन्ति?

(अ) मानवाः (ब) असुराः (स) देवाः (द) भारतीयाः

(ii) देवाः देवत्वम् विहाय केन रूपेण जन्मग्रहणार्थम् अभिलषन्ति?

(अ) मनुष्यरूपेण (ब) पशुरूपेण (स) सुररूपेण (द) भूमिरूपेण

(iii) वयं सर्वे भारतीयाः किमर्थम् भाग्यशालिनः?

(अ) स्वर्गे जाताः (ब) भारतभूखण्डे जाताः

(स) विदेशे जाताः (द) पाताले जाताः

**उत्तर :** I. (i) गीतकानि

(ii) सुरत्वात्

II. ये मानवाः अस्यां भारतभूमौ जन्म प्राप्नुवन्ति ते धन्याः।

III. (i) (स) देवाः

(ii) (अ) मनुष्यरूपेण

(iii) (ब) भारतभूखण्डे जाताः।

109. दुर्जनेन समं सख्यं प्रीतिं चापि न कारयेत्।

उष्णो दहति चाङ्गारः शीतः कृष्णायते करम् ॥

I. एकपदेन उत्तरत -

(i) दुर्जनेन समं किम् न कारयेत्?

(ii) कः करम् कृष्णायते?

II. पूर्णवाक्येन उत्तरत -

उष्णः अङ्गारः किम् करोति?

III. निर्देशानुसारम् उत्तरत -

(i) सख्यम् केन समं न कुर्यात्?

(अ) सत्पुरुषेण (ब) सज्जनेन (स) दुर्जनेन (द) कोऽपि न

(ii) यदा अङ्गारः उष्णः भवति, केन करम् ज्वालयति?

(अ) शीतेन (ब) तापेन (स) कटुवचनेन (द) मृदुवचनेन

(iii) दुर्जनः किमर्थं परिहर्तव्यम्?

(अ) अनिष्टम् करोति (ब) अहितम् करोति (स) छलम् करोति (द) सर्वे

**उत्तर :** I. (i) सख्यम्/प्रीतिम्

(ii) शीतः अङ्गारः

II. उष्णः अङ्गारः तापेन करं ज्वालयति।

III.(i) (स) दुर्जनेन

(ii) (ब) तापेन

(iii) (द) सर्वे

----- -----